

# গণপতি অথর্ব ষীর্ষম্ (গণপত্যথর্বষীর্ষোপনিষত্)-॥ গণপত্যথর্বশীর্ষোপনিষত্

https://www.chalisa.online

|| গণপতি অথর্ব ষীর্ষম্ (গণপত্যথর্বষীর্ষোপনিষত্) ||
॥ গণপত্যথর্বশীর্ষোপনিষত্ (শ্রী গণেষাথর্বষীর্ষম্) ॥
ওং ভদ্রং কর্ণেভিঃ শৃণুযাম দেবাঃ । ভদ্রং পশ্যেমাক্ষভির্যজত্রাঃ । স্থিরৈরংগৈস্তুষ্ঠুবাগ্-ম্
সস্তনূভিঃ । ব্যশেম দেবহিতং যদাযুঃ । স্বস্তি ন ইংদ্রো বৃদ্ধশ্রবাঃ । স্বস্তি
নঃ পূষা বিশ্ববেদাঃ । স্বস্তি নস্তার্ক্ষ্যো অরিষ্টনেমিঃ । স্বস্তি নো বৃহস্পতির্দধাতু
ওং শাংতিঃ শাংতিঃ শাংতিঃ ॥
ওং নমস্তে গণপতযে । ত্বমেব প্রত্যক্ষং তত্ত্বমসি । ত্বমেব কেবলং কর্তাঽসি ।
ত্বমেব কেবলং ধর্তাঽসি । ত্বমেব কেবলং হর্তাঽসি । ত্বমেব সর্বং খল্বিদং ব্রহ্মাসি
। ত্বং সাক্ষাদাত্মাঽসি নিত্যম্ ॥ 1 ॥
ঋতং বচ্মি । সত্যং বচ্মি ॥ 2 ॥
অব ত্বং মাম্ । অব বক্তারম্ । অব শ্রোতারম্ । অব দাতারম্ । অব ধাতারম্ । অবানূচানমব
শিষ্যম্ । অব পশ্চাত্তাত্ । অব পুরস্তাত্ । অবোত্তরাত্তাত্ । অব দক্ষিণাত্তাত্
। অব চোর্ধ্বাত্তাত্ । অবাধরাত্তাত্ । সর্বতো মাং পাহি পাহি সমংতাত্ ॥ 3
ত্বং বাঙ্মযস্ত্বং চিন্মযঃ । ত্বমানংদমযস্ত্বং ব্রহ্মমযঃ । ত্বং সচ্চিদানংদাঽদ্বিতীযোঽসি
। ত্বং প্রত্যক্ষং ব্রহ্মাসি । ত্বং জ্ঞানমযো বিজ্ঞানমযোঽসি ॥ 4 ॥
সর্বং জগদিদং ত্বত্তো জাযতে । সর্বং জগদিদং ত্বত্তস্তিষ্ঠতি । সর্বং জগদিদং
ত্বযি লযমেষ্যতি । সর্বং জগদিদং ত্বযি প্রত্যেতি । ত্বং ভূমিরাপোঽনলোঽনিলো
নভঃ । ত্বং চত্বারি বাক্পদানি ॥ 5 ॥
ত্বং গুণত্রযাতীতঃ । ত্বং অবস্থাত্রযাতীতঃ । ত্বং দেহত্রযাতীতঃ । ত্বং কালত্রযাতীতঃ
। ত্বং মূলাধারস্থিতোঽসি নিত্যম্ । ত্বং শক্তিত্রযাত্মকঃ । ত্বাং যোগিনো
ধ্যাযংতি নিত্যম্ । ত্বং ব্রহ্মা ত্বং বিষ্ণুস্ত্বং রুদ্রস্ত্বমিংদ্রস্ত্বমগ্নিস্ত্বং
বাযুস্ত্বং সূর্যস্ত্বং চংদ্রমাস্ত্বং ব্রহ্ম ভূর্ভুবঃ স্বরোম্ ॥ 6 ॥
গণাদিং পূর্বমুচ্চার্য বর্ণাদীং স্তদনংতরম্ । অনুস্বারঃ পরতরঃ । অর্ধেংদুলসিতম্
। তারেণ ঋদ্ধম্ । এতত্তব মনুস্বরূপম্ । গকারঃ পূর্বরূপম্ । অকারো মধ্যমরূপম্
। অনুস্বারশ্চাংত্যরূপম্ । বিংদুরুত্তররূপম্ । নাদঃ সংধানম্ । সগ্-ম্হিতা সংধিঃ
। সৈষা গণেশবিদ্যা । গণক ঋষিঃ । নিচৃদ্গাযত্রীচ্ছংদঃ । শ্রী মহাগণপতির্দেবতা
। ওং গং গণপতযে নমঃ ॥ 7 ॥
একদংতায বিদ্মহে বক্রতুংডায ধীমহি ।
তন্নো দংতিঃ প্রচোদযাত্ ॥ 8 ॥
একদংতং চতুর্হস্তং পাশমংকুশধারিণম্ । রদং চ বরদং হস্তৈর্বিভ্রাণং মূষকধ্বজম্
। রক্তং লংবোদরং শূর্পকর্ণকং রক্তবাসসম্ । রক্তগংধানুলিপ্তাংগং রক্তপুষ্পৈঃ
সুপূজিতম্ । ভক্তানুকংপিনং দেবং জগত্কারণমচ্যুতম্ । আবির্ভূতং চ সৃষ্ট্যাদৌ
প্রকৃতেঃ পুরুষাত্পরম্ । এবং ধ্যাযতি যো নিত্যং স যোগী যোগিনাং বরঃ ॥ 9
নমো ব্রাতপতযে নমো গণপতযে নমঃ প্রমথপতযে নমস্তেঽস্তু লংবোদরাযৈকদংতায
বিঘ্নবিনাশিনে
শিবসুতায শ্রীবরদমূর্তযে
নমঃ ॥ 10 ॥
এতদথর্বশীর্ষং যোঽধীতে । স ব্রহ্মভূযায কল্পতে । স সর্ববিঘ্নৈর্ন বাধ্যতে
। স সর্বতঃ সুখমেধতে । স পংচমহাপাপাত্ প্রমুচ্যতে । সাযমধীযানো দিবসকৃতং পাপং
নাশযতি । প্রাতরধীযানো রাত্রিকৃতং পাপং নাশযতি । সাযং প্রাতঃ প্রযুংজানো
পাপোঽপাপো ভবতি । ধর্মার্থকামমোক্ষং চ বিংদতি । ইদমথর্বশীর্ষমশিষ্যায ন
দেযম্ । যো যদি মোহাদ্ দাস্যতি স পাপীযান্ ভবতি । সহস্রাবর্তনাদ্যং যং কামমধীতে
। তং তমনেন সাধযেত্ ॥ 11 ॥
অনেন গণপতিমভিষিংচতি । স বাগ্মী ভবতি । চতুর্থ্যামনশ্নন্ জপতি স বিদ্যাবান্
ভবতি । ইত্যথর্বণবাক্যম্ । ব্রহ্মাদ্যাচরণং বিদ্যান্ন বিভেতি কদাচনেতি ॥ 12
যো দূর্বাংকুরৈর্যজতি স বৈশ্রবণোপমো ভবতি । যো লাজৈর্যজতি স যশোবান্ ভবতি
। স মেধাবান্ ভবতি । যো মোদকসহস্রেণ যজতি স বাংছিতফলমবাপ্নোতি । যঃ সাজ্য
সমিদ্ভির্যজতি স সর্বং লভতে স সর্বং লভতে ॥ 13 ॥
অষ্টৌ ব্রাহ্মণান্ সম্যগ্ গ্রাহযিত্বা সূর্যবর্চস্বী ভবতি । সূর্যগ্রহে মহানদ্যাং
প্রতিমাসন্নিধৌ বা জপ্ত্বা সিদ্ধমংত্রো ভবতি । মহাবিঘ্নাত্ প্রমুচ্যতে ।
মহাদোষাত্ প্রমুচ্যতে । মহাপাপাত্ প্রমুচ্যতে । মহাপ্রত্যবাযাত্ প্রমুচ্যতে
। স সর্ববিদ্ভবতি স সর্ববিদ্ভবতি । য এবং বেদ । ইত্যুপনিষত্ ॥ 14 ॥
ওং ভদ্রং কর্ণেভিঃ শৃণুযাম দেবাঃ । ভদ্রং পশ্যেমাক্ষভির্যজত্রাঃ । স্থিরৈরংগৈস্তুষ্ঠুবাগ্-ম্
সস্তনূভিঃ । ব্যশেম দেবহিতং যদাযুঃ । স্বস্তি ন ইংদ্রো বৃদ্ধশ্রবাঃ । স্বস্তি
নঃ পূষা বিশ্ববেদাঃ । স্বস্তি নস্তার্ক্ষ্যো অরিষ্টনেমিঃ । স্বস্তি নো বৃহস্পতির্দধাতু
ওং শাংতিঃ শাংতিঃ শাংতিঃ ॥

|| https://www.chalisa.online ||